শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ দ্বিপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্বিপঞ্চাশঃ সর্গঃ ॥

## ধূম্রাক্ষস্য যুদ্ধং তস্য হনুমতা ৱধশ্চ

ধূম্রাক্ষং প্রেক্ষ্য নির্যান্তং রাক্ষসং ভীমৱিক্রমম্।
ৱিনেদুর্ৱানরাঃ সর্ৱে প্রহৃষ্টা যুদ্ধকাঙ্ক্ষিণঃ ॥ **6.52.1** ॥

তেষাং সুতুমুলং যুদ্ধং সঞ্জজ্ঞে কপিরক্ষসাম্।
অন্যোন্যং পাদপৈর্ঘোরৈর্নিঘ্নতাং শূলমুদ্গরৈঃ ॥ **6.52.2** ॥

রাক্ষসৈর্ৱানরা ঘোরা ৱিনিকৃত্তাঃ সমন্ততঃ।
ৱানরৈ রাক্ষসাশ্চাপি দ্রুমৈর্ভূমিসমীকৃতাঃ ॥ **6.52.3** ॥

রাক্ষসাস্ত্বভিসঙ্ক্রুদ্ধা ৱানরান্ নিশিতৈঃ শরৈঃ।
ৱিৱ্যধুর্ঘোরসঙ্কাশৈঃ কঙ্কপত্রৈরজিহ্মগৈঃ ॥ **6.52.4** ॥

তে গদাভিশ্চ ভীমাভিঃ পট্টিশৈঃ কূটমুদ্গরৈঃ।
ঘোরৈশ্চ পরিঘৈশ্চিত্রৈস্ত্রিশূলৈশ্চাপি সংশ্রিতৈঃ ॥ **6.52.5** ॥

ৱিদার্যমাণা রক্ষোভির্ৱানরাস্তে মহাবলাঃ।
অমর্ষজনিতোদ্ধর্ষাশ্চক্রুঃ কর্মাণ্যভীতৱৎ ॥ **6.52.6** ॥

শরনির্ভিন্নগাত্রাস্তে শূলনির্ভিন্নদেহিনঃ।
জগৃহুস্তে দ্রুমাংস্তত্র শিলাশ্চ হরিযূথপাঃ ॥ **6.52.7** ॥

তে ভীমৱেগা হরযো নর্দমানাস্ততস্ততঃ।
মমন্থূ রাক্ষসান্ ৱীরান্ নামানি চ বভাষিরে॥ **6.52.8**॥

তদ্ বভূৱাদ্ভুতং ঘোরং যুদ্ধং ৱানররক্ষসাম্।
শিলাভির্ৱিৱিধাভিশ্চ বহুশাখৈশ্চ পাদপৈঃ॥ **6.52.9**॥

রাক্ষসা মথিতাঃ কেচিদ্ ৱানরৈর্জিতকাশিভিঃ।
প্রৱেমূ রুধিরং কেচিন্মুখৈ রুধিরভোজনাঃ॥ **6.52.10**॥

পার্শ্বেষু দারিতাঃ কেচিৎ কেচিদ্ রাশীকৃতা দ্রুমৈঃ।
শিলাভিশ্চূর্ণিতাঃ কেচিৎ কেচিদ্ দন্তৈর্ৱিদারিতাঃ॥ **6.52.11**॥

ধ্ৱজৈর্ৱিমথিতৈর্ভগ্নৈঃ খড্গৈশ্চ ৱিনিপাতিতৈঃ।
রথৈর্ৱিধ্ৱংসিতৈঃ কেচিদ্ ৱ্যথিতা রজনীচরাঃ॥ **6.52.12**॥

গজেন্দ্রৈঃ পর্ৱতাকারৈঃ পর্ৱতাগ্রৈর্ৱনৌকসাম্।
মথিতৈর্ৱাজিভিঃ কীর্ণং সারোহৈর্ৱসুধাতলম্॥ **6.52.13**॥

ৱানরৈর্ভীমৱিক্রান্তৈরাপ্লুত্যোৎপ্লুত্য ৱেগিতৈঃ।
রাক্ষসাঃ করজৈস্তীক্ষ্ণৈর্মুখেষু ৱিনিদারিতাঃ॥ **6.52.14**॥

ৱিষণ্ণৱদনা ভূযো ৱিপ্রকীর্ণশিরোরুহাঃ।
মূঢাঃ শোণিতগন্ধেন নিপেতুর্ধরণীতলে॥ **6.52.15**॥

অন্যে তু পরমক্রুদ্ধা রাক্ষসা ভীমৱিক্রমাঃ।
তলৈরেৱাভিধাৱন্তি ৱজ্রস্পর্শসমৈর্হরীন্॥ **6.52.16**॥

ৱানরৈঃ পাতযন্তস্তে ৱেগিতা ৱেগৱত্তরৈঃ।
মুষ্টিভিশ্চরণৈর্দন্তৈঃ পাদপৈশ্চাৱপোথিতাঃ॥ **6.52.17**॥

সৈন্যং তু ৱিদ্রুতং দৃষ্টৱা ধূম্রাক্ষো রাক্ষসর্ষভঃ।
রোষেণ কদনং চক্রে ৱানরাণাং যুযুৎসতাম্॥ **6.52.18**॥

প্রাসৈঃ প্রমথিতাঃ কেচিদ্ ৱানরাঃ শোণিতস্রৱাঃ।
মুদ্গরৈরাহতাঃ কেচিৎ পতিতা ধরণীতলে॥ **6.52.19**॥

পরিঘৈর্মথিতাঃ কেচিদ্ ভিন্দিপালৈশ্চ দারিতাঃ।
পট্টিশৈর্মথিতাঃ কেচিদ্ ৱিহ্ৱলন্তো গতাসৱঃ॥ **6.52.20**॥

কেচিদ্ ৱিনিহতা ভূমৌ রুধিরার্দ্রা ৱনৌকসঃ।
কেচিদ্ ৱিদ্রাৱিতা নষ্টাঃ সঙ্ক্রুদ্ধৈ রাক্ষসৈর্যুধি॥ **6.52.21**॥

ৱিভিন্নহৃদযাঃ কেচিদেকপার্শ্ৱেন শাযিতাঃ।
ৱিদারিতাস্ত্রিশূলৈশ্চ কেচিদান্ত্রৈর্ৱিনিঃসৃতাঃ॥ **6.52.22**॥

তৎ সুভীমং মহদ্যুদ্ধং হরিরাক্ষসসঙ্কুলম্।
প্রবভৌ শস্ত্রবহুলং শিলাপাদপসঙ্কুলম্॥ **6.52.23**॥

ধনুর্জ্যাতন্ত্রিমধুরং হিক্কাতালসমন্ৱিতম্।
মন্দস্তনিতগীতং তদ্ যুদ্ধগান্ধর্ৱমাবভৌ॥ **6.52.24**॥

ধূম্রাক্ষস্তু ধনুষ্পাণির্ৱানরান্ রণমূর্ধনি।
হসন্ ৱিদ্রাৱযামাস দিশস্তাঞ্ছরৱৃষ্টিভিঃ॥ **6.52.25**॥

ধূম্রাক্ষেণার্দিতং সৈন্যং ৱ্যথিতং প্রেক্ষ্য মারুতিঃ।
অভ্যৱর্তত সঙ্ক্রুদ্ধঃ প্রগৃহ্য ৱিপুলাং শিলাম্॥ **6.52.26**॥

ক্রোধাদ্ দ্বিগুণতাম্রাক্ষঃ পিতুস্তুল্যপরাক্রমঃ।
শিলাং তাং পাতযামাস ধূম্রাক্ষস্য রথং প্রতি॥ **6.52.27**॥

আপতন্তীং শিলাং দৃষ্টৱা গদামুদ্যম্য সম্ভ্রমাৎ।
রথাদাপ্লুত্য ৱেগেন ৱসুধাযাং ৱ্যতিষ্ঠত॥ **6.52.28**॥

সা প্রমথ্য রথং তস্য নিপপাত শিলা ভুৱি।
সচক্রকূবরং সাশ্ৱং সধ্ৱজং সশরাসনম্॥ **6.52.29**॥

স ভঙ্ক্ৎৱা তু রথং তস্য হনূমান্ মারুতাত্মজঃ।
রক্ষসাং কদনং চক্রে সস্কন্ধৱিটপৈর্দ্রুমৈঃ॥ **6.52.30**॥

ৱিভিন্নশিরসো ভূৎৱা রাক্ষসা রুধিরোক্ষিতাঃ।
দ্রুমৈঃ প্রমথিতাশ্চান্যে নিপেতুর্ধরণীতলে॥ **6.52.31**॥

ৱিদ্রাৱ্য রাক্ষসং সৈন্যং হনূমান্ মারুতাত্মজঃ।
গিরেঃ শিখরমাদায ধূম্রাক্ষমভিদুদ্রুৱে॥ **6.52.32**॥

তমাপতন্তং ধূম্রাক্ষো গদামুদ্যম্য ৱীর্যৱান্।
ৱিনর্দমানঃ সহসা হনূমন্তমভিদ্রৱৎ॥ **6.52.33**॥

তস্য ক্রুদ্ধস্য রোষেণ গদাং তাং বহুকণ্টকাম্।
পাতযামাস ধূম্রাক্ষো মস্তকেঽথ হনূমতঃ॥ **6.52.34**॥

তাডিতঃ স তযা তত্র গদযা ভীমৱেগযা।
স কপির্মারুতবলস্তং প্রহারমচিন্তযন্॥ **6.52.35**॥

ধূম্রাক্ষস্য শিরোমধ্যে গিরিশৃঙ্গমপাতযৎ।
স ৱিস্ফারিতসর্ৱাঙ্গো গিরিশৃঙ্গেণ তাডিতঃ॥ **6.52.36**॥

পপাত সহসা ভূমৌ ৱিকীর্ণ ইৱ পর্ৱতঃ।
ধূম্রাক্ষং নিহতং দৃষ্টৱা হতশেষা নিশাচরাঃ।
ত্রস্তাঃ প্রৱিৱিশুর্লঙ্কাং ৱধ্যমানাঃ প্লৱঙ্গমৈঃ॥ **6.52.37**॥

স তু পৱনসুতো নিহত্য শত্রূন্
ক্ষতজৱহাঃ সরিতশ্চ সংৱিকীর্য।
রিপুৱধজনিতশ্রমো মহাত্মা
মুদমগমৎ কপিভিঃ সুপূজ্যমানঃ॥ **6.52.38**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে দ্বিপঞ্চাশঃ সর্গঃ॥